# Rudra Upanishad

# રુદ્રોપનિષત્

## Document Information

Text title : rudropaniShat

File name : rudropaniShat.itx

Category : upanishhat, shiva

Location : doc_upanishhat

Proofread by : Kasturi navya sahiti kasturinsahiti at gmail.com

Description-comments : aprakAshitA upaniShadaH

Latest update : March 20, 2020

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 19, 2024

*sanskritdocuments.org*

---

Rudra Upanishad

# રુદ્રોપનિષત્

વિશ્વમયો બ્રાહ્મણઃ શિવં વ્રજતિ । બ્રાહ્મણઃ પઞ્ચાક્ષરમનુભવતિ । બ્રાહ્મણઃ શિવપૂજારતઃ । શિવભક્તિવિહીનશ્ચેત્ સ ચણ્ડાલ ઉપચણ્ડાલઃ । ચતુર્વેદજ્ઞોઽપિ શિવભક્ત્યાન્તર્ભવતીતિ સ એવ બ્રાહ્મણઃ । અધમશ્ચાણ્ડાલોઽપિ શિવભક્તોઽપિ બ્રાહ્મણાચ્છ્રેષ્ઠતરઃ । બ્રાહ્મણસ્ત્રિપુણ્ડ્રધૃતઃ । અત એવ બ્રાહ્મણઃ । શિવભક્તેરેવ બ્રાહ્મણઃ । શિવલિઙ્ગાર્ચનયુતશ્ચાણ્ડાલોઽપિ સ એવ બ્રાહ્મણાધિકોવતિ । અગ્નિહોત્રભસિતાચ્છિવભક્તચાણ્ડાલહસ્તવિભૂતિઃ શુદ્ધા । કપિશા વા શ્વેતજાપિ ધૂમ્રવર્ણા વા । વિરક્તાનાં તપસ્વિનાં શુદ્ધા । ગૃહસ્થાનાં નિર્મલવિભૂતિઃ । તપસ્વિભિઃ સર્વભસ્મ ધાર્યમ્ । યદ્વા શિવભક્તિસમ્પુષ્ટં સદાપિ તદ્ભસિતં દેવતાધાર્યમ્ ॥

ૐ અગ્નિરિતિ ભસ્મ । વાયુરિતિ ભસ્મ । સ્થલમિતિ ભસ્મ । જલમિતિ ભસ્મ । વ્યોમેતિ ભસ્મ ઇત્યાદ્યુપનિષત્કારણાત્ તત્ કાર્યમ્ । અન્યત્ર
“વિશ્વતશ્ચક્ષુરુત વિશ્વતોમુખો વિશ્વતોહસ્ત ઉત વિશ્વતસ્પાત્ ।
સં બાહુભ્યાં નમતિ સં પતત્રૈર્દ્યાવાપૃથિવી જનયન્ દેવ એકઃ ।”
તસ્માત્પ્રાણલિઙ્ગી શિવઃ । શિવ એવ પ્રાણલિઙ્ગી । જટાભસ્મધારોઽપિ પ્રાણજલિઙ્ગી હિ શ્રેષ્ઠઃ । પ્રાણલિઙ્ગી શિવરૂપઃ । શિવરૂપઃ પ્રાણલિઙ્ગી । જઙ્ગમરૂપઃ શિવઃ । શિવ એવ જઙ્ગમરૂપઃ । પ્રાણલિઙ્ગિનાં શુદ્ધસિદ્ધિર્ન ભવતિ । પ્રાણલિઙ્ગિનાં જઙ્ગમપૂજ્યાનાં પૂજ્યતપસ્વિનામધિકશ્ચણ્ડાલોઽપિ પ્રાણલિઙ્ગી । તસ્માત્પ્રાણલિઙ્ગી વિશેષ ઇત્યાહ । ય એવં વેદ સ શિવઃ । શિવ એવ રુદ્રઃ પ્રાણલિઙ્ગી નાન્યો ભવતિ ॥

ૐ આત્મા પરશિવદ્વયો ગુરુઃ શિવઃ । ગુરૂણાં સર્વવિશ્વમિદં વિશ્વમન્ત્રેણ ધાર્યમ્ । દૈવાધીનં જગદિદમ્ । તદ્દૈવં તન્મન્ત્રાત્ તનુતે । તન્મે દૈવં ગુરુરિતિ । ગુરૂણાં સર્વજ્ઞાનિનાં ગુરુણા દત્તમેતદન્નં પરબ્રહ્મ । બ્રહ્મ સ્વાનુભૂતિઃ । ગુરુઃ શિવો દેવઃ ।

ગુરુઃ શિવ એવ લિઙ્ગમ્ । ઉભયોર્મિશ્રપ્રકાશત્વાત્ । પ્રાણવત્ત્વાત્
મહેશ્વરત્વાચ્ચ શિવસ્તદૈવ ગુરુઃ । યત્ર ગુરુસ્તત્ર શિવઃ ।
શિવગુરુસ્વરૂપો મહેશ્વરઃ । ભ્રમરકોટકાર્યેણ દીક્ષિતાઃ શિવયોગિનઃ
શિવપૂજાપથે ગુરુપૂજાવિધૌ ચ મશ્વરપૂજનાન્મુક્તાઃ । લિઙ્ગાભિષેકં
નિર્માલ્યં ગુરોરભિષેકતીર્થં મહેશ્વરપાદોદકં જન્મમાલિન્યં
ક્ષાલયન્તિ । તેષાં પ્રીતિઃ શિવપ્રીતિઃ । તેષાં તૃપ્તિઃ શિવતૃપ્તિઃ ।
તૈશ્ચ પાવનો વાસઃ । તેષાં નિરસનં શિવનિરસનમ્ । આનન્દપારાયણઃ ।
તસ્માચ્છિવં વ્રજન્તુ । ગુરું વ્રજન્તુ । ઇત્યેવ પાવનમ્ ॥

(શૈવ-ઉપનિષદઃ)

ઇતિ રુદ્રોપનિષત્ સમાપ્તા ।

Proofread by Kasturi navya sahiti

*Rudra Upanishad*

pdf was typeset on February 19, 2024

Please send corrections to *sanskrit@cheerful.com*